CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः।अथउग्ररथशांतिः।अथातःसंप्रवक्ष्यामि शांतिंचोग्ररथस्यच।ब्रह्मणा
प्रोक्तमृषिभिर्नृपवैश्यांशुद्रोचैवच योषितां॥१॥यदिस्यात्सप्तिवर्षेतुचतुरशीतिवत्सरात्।मासे
प्राप्तेसकृत्तस्यतदामृत्युर्भवेध्रुवं॥२॥दुःस्वप्नानिचजायंतेमातापित्रोर्मृतिस्तथा।भार्या
पुत्रवियोगस्यचोराग्न्यादिभयस्तथा॥३॥ग्रहपीडाराजजलाधारोगाश्चविविधाश्चये।दंत
बाधादृष्टिर्नोधंधायाविकृतिस्तथा॥४॥नक्षत्राणिनदृश्यंतेध्रुवादीनिस्फुटान्यपि।
प्रेतभूतपिशाचाश्चदृश्यंतेविविधाश्चये॥५॥एतेचान्येमहोत्पातादृश्यंतेषष्टिवत्सरेतदा
एनिराशार्थंशांतिंवक्ष्यामिशौनक!॥६॥लोभादनादरोग्रस्तःशांतिकर्मनकारयेत्।तस्मि
न्वर्षेभवेन्मृत्युःसत्यमेवनसंशयः॥७॥अथनेष्टसंजातेपुनर्जन्मतदुच्यते।जन्मासात्पूर्व
मेवस्यात्षण्मासात्परतस्तथा॥८॥रथावतीर्णःपुरुषःनव्यरथमतःपरं।आरूढकालोयदृच्च
तद्धनंसमाचरेत्॥९॥तस्मिन्वर्षेजन्मदिनेयदृर्क्षंयदाभवेत्।तस्मिन्दिनेदुर्गशांतेर्मंगलंस्नानं
माचरेत्॥१०

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नित्यकर्मसिद्धिनिर्वर्त्यब्राह्मणानामिमंत्र्यच।आचार्यवरयेदादौवेदवेदांगपारगं॥११॥
आचारवंतंधर्मज्ञंशांतिकर्मसिद्धोनिधिं।कामक्रोधविहीनश्चरागद्वेषविवर्जितं॥१२॥
गणेशंप्रार्थयेदादौतःपुण्याहवाचनं।मातृकापूजनंचैवनांदीश्राद्धमतःपरं॥१३॥आचा
र्यंब्रह्मवरणमन्वाधानततःपरं।सर्वौषधीःसमानीयपंचगव्यंपंचपल्लवं॥१४॥पंचामृतंपंच
गव्यंसमिधाज्याचरुस्रुचा।कलशांश्चसमानीयज्ञहानिर्विघ्नपुरःसरं॥१५॥नवज्ञहासमा
राध्यमार्कंडेयंप्रधानकं।पलेनवातदर्धेनतदर्धार्धेनवापुनः॥१६॥समिदाज्यचरुद्रव्यैर्दू
र्वाभिःपरमान्नकैः।अष्टोत्तरसहस्रंवाअष्टोत्तरशतंतुवा॥१७॥प्रत्येकंजुहुयाद्धोमा
र्कंडेयेतिमंत्रतः।मृत्युंजयसमृद्धिरूपदूर्वाभिश्चतिलैःसह॥१८॥अयुतंवातदर्धंवा
त्रिसहस्रंसहस्रकं।होमंकृत्वाविधानेनइष्टदेवान्पदेपदे॥१९॥लोकपालोमंत्रप्रकृ
र्वीतयथाविभवविस्तरं।

Kashi Maharani Collection, Ramnagar Fort, Varanasi